# द्वादशः पाठः

## स्वरान्त-पुंलिङ्गः

### तृतीया विभक्ति-प्रयोगः - (ତୃତୀୟା ବିଭକ୍ତି ବ୍ୟବହାର)

पश्यतु उच्चैः पठतु लिखतु च । ଦେଖ, ବଡ଼ପାଟିରେ ପଢ଼ ଓ ଲେଖ ।



बालकः



कन्दुकः



बालकः कन्दुकेन खेलति ।

शिशुः हस्तेन खादति

छात्रः कलमेन लिखति ।

शिक्षकः सुधाखण्डेन लिखति ।

वीरः रथेन गच्छति ।

सैनिकः घोटकेन भ्रमति ।

माता दीपेन पूजयति ।

बालकः पादाभ्यां चलति ।

शिशुः कर्णाभ्यां शृणोति ।

सज्जनः कराभ्यां ददाति ।

घोटकः पादैः गच्छति ।

वीराः रथैः गच्छन्ति ।

बालकाः चषकैः पिबन्ति ।

**ଶବ୍ଦାର୍ଥ :** ସୁଧାଖଣ୍ଡେନ - ଚକ୍‌ରେ, କର୍ଣ୍ଣାଭ୍ୟାମ୍ - କାନରେ, ଚଷକୈଃ - ପାନପାତ୍ର(ଗ୍ଲାସ)ରେ, ପିଆଲାରେ, ପାଦୈଃ - ପାଦଗୁଡ଼ିକରେ

## स्वरान्त-स्त्रीलिङ्गः (तृतीयाविभक्तिः)


बालिका


द्विचक्रिका


बालिका द्विचक्रिकया गच्छति ।

सीता मालया अलङ्करोति ।

गीता लेखन्या लिखति ।

## स्वरान्त-नपुंसकलिङ्गः (तृतीयाविभक्तिः)

पुरुषः जलेन सिञ्चति । मानवः नेत्राभ्यां पश्यति । जनः यानेन गच्छति ।

शिशुः दुग्धेन तुष्यति । माता पुष्पैः पूजयति ।

**उच्चैःपठतु अवगच्छतु (ବଡ଼ ପାଟିରେ ପଢ଼ ଓ ବୁଝ ।)**

| प्रथमाविभक्तिः | तृतीयाविभक्तिः | | |
|---|---|---|---|
| एकवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| बालकः | बालकेन | बालकाभ्याम् | बालकैः |
| गजः | गजेन | गजाभ्याम् | गजैः |
| अश्वः | अश्वेन | अश्वाभ्याम् | अश्वैः |
| वीरः | वीरेण | वीराभ्याम् | वीरैः |
| वानरः | वानरेण | वानराभ्याम् | वानरैः |
| छात्रः | छात्रेण | छात्राभ्याम् | छात्रैः |
| शिक्षकः | शिक्षकेण | शिक्षकाभ्याम् | शिक्षकैः |

| | | | |
|---|---|---|---|
| बालिका | बालिकया | बालिकाभ्याम् | बालिकाभिः |
| माला | मालया | मालाभ्याम् | मालाभिः |
| लता | लतया | लताभ्याम् | लताभिः |
| लेखनी | लेखन्या | लेखनीभ्याम् | लेखनीभिः |
| अङ्कनी | अङ्कन्या | अङ्कनीभ्याम् | अङ्कनीभिः |

| | | | |
|---|---|---|---|
| फलम् | फलेन | फलाभ्याम् | फलैः |
| पुष्पम् | पुष्पेण | पुष्पाभ्याम् | पुष्पैः |
| चित्रम् | चित्रेण | चित्राभ्याम् | चित्रैः |

| | | | |
|---|---|---|---|
| कविः | कविना | कविभ्याम् | कविभिः |
| अतिथिः | अतिथिना | अतिथिभ्याम् | अतिथिभिः |
| शिशुः | शिशुना | शिशुभ्याम् | शिशुभिः |
| गुरुः | गुरुणा | गुरुभ्याम् | गुरुभिः |
| पिता | पित्रा | पितृभ्याम् | पितृभिः |

| | | | |
|---|---|---|---|
| धेनुः | धेन्वा | धेनुभ्याम् | धेनुभिः |
| वधूः | वध्वा | वधूभ्याम् | वधूभिः |

**ଶବ୍ଦାର୍ଥ -** ଦ୍ୱିଚକ୍ରିକା - ସାଇକେଲ, ଅଳଙ୍କରୋତି - ଭୂଷିତ କରୁଛି, ଲେଖନ୍ୟା - କଲମରେ, ସିଞ୍ଚତି - ସେଚନ କରୁଛି ।

# अभ्यासः (ଅଭ୍ୟାସ)



१. शून्यस्थानं पूरयतु - (ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)

क) चित्रेण, चित्राभ्याम्, ________।

ख) पित्रा, ________, पितृभिः ।

ग) पुष्पेण, ________, पुष्पैः ।

घ) ________, गजाभ्याम्, गजैः ।

ङ) वानरेण, वानराभ्याम्, ________ ।

२. **मातृभाषया अर्थं लिखतु** (ମାତୃଭାଷାରେ ଅର୍ଥ ଲେଖ)

धेनुभ्याम्, चित्रैः, लेखन्या, गजेन, शिक्षकैः

३. **संस्कृतभाषया लिखतु** (ସଂସ୍କୃତଭାଷାରେ ଲେଖ)

ବୀରଦ୍ୱାରା, ହାତରେ, ଛାତ୍ରମାନଙ୍କଦ୍ୱାରା, ଘୋଡ଼ାରେ, ବଳରେ ।

४. पश्यतु, शून्यस्थानं पूरयतु (ଦେଖ ଓ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣ କର)(ତୃତୀୟା ବିଭକ୍ତି ଆଧାରରେ)

- वीरः घोटकेन गच्छति । (घोटकः)
- सज्जनः ________ ददाति । (हस्तौ)
- बालकाः ________ खादन्ति । (चमसाः)(ଚାମଚ)
- माता ________ पूजयति । (माला)
- छात्राः ________ लिखन्ति । (लेखन्यः)
- एते ________ शृण्वन्ति । (कर्णौ)

कोष्ठकं पश्यतु, वाक्यं लिखतु ।

५. क) କୋଠରୀ ଦେଖ, ବାକ୍ୟ ଲେଖ ।

- त्वं लेखन्या लिखसि ।
- युवां लेखनीभ्यां________ ।
- यूयं लेखनीभिः ________ ।

| त्वम् | युवाम् | यूयम् |
|---|---|---|
| ↓ | ↓ | ↓ |
| लेखनी | लेखन्यौ | लेखन्यः |
| ↓ | ↓ | ↓ |
| लिखसि | लिखथः | लिखथ |

ख) - अहं हस्तेन ________________।
- आवां हस्ताभ्यां ______________।
- वयं हस्तैः ________________ ।

| खादामि | खादावः | खादामः |
| --- | --- | --- |
| ↑ | ↑ | ↑ |
| हस्तः | हस्तौ | हस्ताः |
| ↑ | ↑ | ↑ |
| अहम् | आवाम् | वयम् |

६. बन्धनीस्थित शुद्धपदैः रिक्तस्थानानि पूरयतु-
(ବନ୍ଧନୀରେ ଥିବା ଶୁଦ୍ଧପଦରେ ଶୂନ୍ୟସ୍ଥାନ ପୂରଣକର)

(१) सिंहाः <u>पादैः</u> गच्छन्ति। (पादाः, पादैः)

(२) वानरः _______ खादति (हस्तेन, हस्तान्)

(३) पूजकः _______ पूजयति। (पूष्पाणि, पुष्पैः)

(४) कृषकः _______ कुक्कुरं ताड़यति। (दण्डाः, दण्डेन)

(५) छात्रः _______ चित्रं करोति। (अङ्गुली, अङ्गुल्या)

(६) पुत्रः _______ सह भ्रमति। (पितरि, पित्रा)

(७) मानवः _______ पश्यति। (लोचनम्, लोचनाभ्याम्)

(८) ते _______ शृण्वन्ति। (कर्णाः, कर्णाभ्याम्)

(९) चतुरः बालकः _______ जयति। (मतिः, मत्या)

(१०) मूषकः _______ छिनत्ति। (दन्तान्, दन्तैः)

୭. ମୌଖିକାଭ୍ୟାସଃ -

१. चित्रशब्दस्य तृतीयाविभक्तौ रूपं कथयतु ।
२. पितृशब्दस्य तृतीयाविभक्तौ रूपं कथयतु ।
३. फलशब्दस्य तृतीयाविभक्तौ रूपं कथयतु ।
४. लेखनीशब्दस्य तृतीयाविभक्तौ रूपं कथयतु ।
५. शिक्षकशब्दस्य तृतीयाविभक्तौ रूपं कथयतु ।

***